**AH-V/SNS-DSE-1/19**

# B.A. 5th Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 50916** **Course Code : AHSNS-503-DSE-1**

Course Title: Veda

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु प्रश्नेषु *पञ्चप्रश्ना:* सुरगिरा देवनागरलिप्या लघुतया च समाधेया:। 2×5=10

(a) भूमिसूक्तस्य क: ऋषि:? अस्मिन् सूक्ते साकल्येन कति मन्त्रा: सन्ति?

(b) 'विश्वंभरा वसुधानी' इत्यत्र 'वसुधानी'–पदस्य कोऽर्थ:? पृथिव्या: धारका: के भवन्ति?

(c) सांमनस्यसूक्तं कस्मिन् वेदे कस्मिन् वर्तते का च अत्र देवता?

(d) 'सहृदयं सांमनस्यम्' इत्यादि सूक्तस्य क: विनियोग:? 'सांमनस्यम्' इति पदस्य अर्थं लिखत।

(e) देवीसूक्तं कस्मिन् मण्डले वर्तते? अस्य सूक्तस्य क: ऋषि:?

(f) अम्भृणशब्दस्य भाष्यानुसारं कोऽर्थ:?

(g) उष:सूक्तं कस्मिन् वेदे कस्मिन् मण्डले च वर्तते? 'ऋतस्य बुध्य उषसाम्' इत्यत्र ऋतस्य पदेन किं बुध्यते?

(h) उषा कथम् 'अमर्त्या' इत्युच्यते?

**2.** अधोलिखितेषु भाष्यवचनेषु यथेच्छं *द्वयं* व्याख्येयम्। 5×2=10

(a) ''अभिजिति शिष्यान् उपनीय श्वोभूते संभारान् संभरति' इति प्रक्रम्य ''गणकर्मभिर्विश्वकर्मभिरायुष्यै: स्वस्त्ययनैराज्यं जुहुयात्'' इति।

(b) गतो विनियोग:।

(c) उष औषस्यमिति प्रातरनुवाके उष: क्रतौ आश्विनशस्त्रे च त्रैष्टुभे छन्दस्येतस्य सूक्तस्य विनियोग:।

**3.** अधस्तात् यथेच्छं *द्वयम्* ऋषिच्छन्दोदेवताविनियोगनिर्देशपूर्वकं व्याख्येयम्। 5×2=10

(a) यस्यां समुद्र उत सिन्धुरापो यस्यामन्नं कृष्टय: सं बभूवु:।

यस्यामिदं जिन्वति प्राणदेजत्सा नो भूमि: पूर्वपेये दधातु।।

(b) अनुव्रत: पितु: पुत्रो मात्रा भवतु संमना:।

जाया पत्ये मधुमतीं वाचं वदतु शान्तिवाम्।

(c) अहं राष्ट्री संगमनी वसूनां
चिकितुषी प्रथमा यज्ञियानाम्।
तां मा देवा व्यदधुः पुरुत्रा
भूरिस्थात्रां भूर्यावेशयन्तीम्।।

(d) उषो वाजेन वाजिनि प्रचेताः स्तोमं जुषस्व गृणतो मघोनि।
पुराणी देवी युवतिः पुरन्धिरनुव्रतं चरसि विश्ववारे।।

**4.** अधस्तात् कस्य*चिदेकस्य* प्रश्नस्योत्तरं वैशद्येन विवृणुत। 10×1=10

(a) पृथिव्याः माहात्म्यं वेदे यथा वर्णितं तथा वैशद्येन विवृणुत।

(b) देवीसूक्तं दार्शनिकसूक्तं न वेति विशदतया विचार्य्यताम्।

(c) सांमनस्यसूक्ते ऐक्यचिन्तनं यथा विहितं तथा भाष्यानुसारं लिखत।

## B.A. 5th Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 50916** **Course Code : AHSNS-503-DSE-1**

Course Title: Kāvya (Sahityadarpana-1-3 Chapter)

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

(सर्वे प्रश्नाः संस्कृतभाषया देवनागरलिप्या समुत्तरणीयाः)

**1.** निम्नलिखितेषु प्रश्नेषु *पञ्चानां* प्रश्नानाम् उत्तरं प्रदेयम्। 2×5=10

(a) 'साहित्यदर्पणे' कति परिच्छेदाः सन्ति? प्रथमपरिच्छेदस्य नाम किम्?

(b) काव्यस्य किं प्रयोजनम् आह आचार्य-विश्वनाथः?

(c) आचार्य-विश्वनाथः वाक्यस्य किं लक्षणमाह?

(d) का नाम व्यञ्जना? कतिविधा च सा?

(e) साहित्यदर्पणस्य रचयिता कः? तस्य पितुर्नाम किम्?

(f) रसस्य किं लक्षणम्? कति के च रसाः?

(g) नायकस्य किं लक्षणम्? नायकस्य कति भेदाः भवन्ति?

(h) मम्मटाचार्यः काव्यस्य किं लक्षणमाह?

**2.** यथानिर्देशं *चत्वारः* प्रश्नाः समाधेयाः। 5×4=20

(a) 'कीटानुबिद्धरत्नादिसाधारण्येन काव्यता'– इति व्याख्यायताम्।

(b) 'वाक्यं स्याद् योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः'– कारिकेयं साधु व्याख्येया।

(c) साहित्यिकाः कुत्र शक्तिग्रहं मन्यन्ते? कुत्र न? इति यथाशास्त्रं वर्णयंत।

(d) 'न विना विप्रलम्भेन सम्भोगः पुष्टिमश्नुते'– इति व्याख्यायताम्।

(e) 'योग्यता', 'अनुभावः'– इत्यनयोः यथेच्छम् *एकम*वलम्ब्य– लघुटीका लेख्या।

(f) लघुटीका लेख्या 'धीरोद्धतनायकः', 'आकाङ्क्षा'– इत्यनयोः यथेच्छ*मेक*माश्रित्य।

(g) व्यञ्जनास्वरूपं प्रतिपादय् अभिधामूला व्यञ्जना सोदाहरणा प्रतिपाद्या।

**Please Turn Over**

**3.** यथेच्छ*मेकस्य* उत्तरं प्रदेयम्। 10×1=10

(a) काव्यस्य प्रयोजनं प्रतिपाद्य प्रमाणानि दर्शनीयनि।

(b) रसलक्षणं प्रदर्शय तदास्वादप्रकारः प्रकाशनीयः।

(c) विश्वनाथोक्तं काव्यलक्षणं सोदाहरणं प्रतिपाद्यताम्।

# B.A. 5th Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 50916** **Course Code : AHSNS-503-DSE-1**

Course Title: Nyāya

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** अधोलिखितेषु *पञ्च* प्रश्नाः समाधेयाः। 2×5=10

(a) उपाधिः कतिविधः?

(b) सखण्डोपाधेः लक्षणं लिख्यताम्।

(c) रूपस्य लक्षणं किम्?

(d) सन्निकर्षरूपसम्बन्धः कस्य प्रयोजकः भवति?

(e) 'भूतले घटो नास्ति'– इत्यत्र अभावः केन सम्बन्धेन भूतले तिष्ठति?

(f) 'द्वौ' 'द्वित्ववान्'– इति पदयोः अर्थविशेषावधारणाय नवीनैः कः सम्बन्धः स्वीक्रियते?

(g) विषयतासम्बन्धस्य उदाहरणं देयम्।

(h) विषयितासम्बन्धस्य उदाहरणं देयम्।

**2.** अधोनिर्दिष्टेषु *चत्वारः* प्रश्नाः समाधेयाः 5×4=20

(a) वृत्तिनियामकसम्बन्धेषु द्वयोः परिचयः देयः।

(b) धर्मः नाम कः–? नव्यन्यायभाषाप्रदीपानुसारं सोदाहरणं लेख्यः।

(c) आधाराधेयभावम् आश्रित्य टीका लेख्या।

(d) असमवायिकारणम् आश्रित्य टीका लेख्या।

(e) 'विशेषणं द्विविधम् सिद्धं साध्यञ्च'– अस्य अंशस्य व्याख्या कार्या।

(f) संसर्गाभावविषये टीका लेख्या।

(g) 'ज्ञानं द्विविधं निर्विकल्पकं सविकल्पकं च–' व्याख्यायताम्।

**3.** यथेच्छम् *एकः* प्रश्नः समाधेयः। 10×1=10

(a) धर्मम् आश्रित्य निबन्धो लेख्यः नव्यन्यायभाषाप्रदीपमवलम्ब्य।

(b) को नाम सम्बन्धः? सम्बन्धस्वरूपं नव्यन्यायभाषाप्रदीपालोकेन स्पष्टीक्रियताम्।

(c) विशेषणस्वरूपमवलम्ब्य निबन्धो विरचनीयः।

# B.A. 5th Semester (Honours) Examination, 2019-20

## SANSKRIT

**Course ID : 50916** **Course Code : AHSNS-503-DSE-1**

Course Title: Vyakaraṇa

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*
*Candidates are required to give their answers in their own words as far as practicable.*

**1.** केचन *पञ्च*प्रश्नाः समाधेयाः। 2×5=10

(a) इन्द्रशब्दस्य स्त्रीलिङ्गे किं रूपं भवति? कश्च प्रत्ययः विधीयते?

(b) 'अतो गुणे' इति सूत्रे 'अतः' इत्यनेन किं बुध्यते?

(c) युवन्शब्दान् स्त्रीलिङ्गे कः प्रत्ययः विधीयते किञ्च रूपं भवति?

(d) 'त्रिलोकी' इत्यत्र ङीष् प्रत्ययः केन सूत्रेण विधीयते?

(e) 'दाक्षी' इत्यस्य केन सूत्रेण ङीष् प्रत्ययः।

(f) 'वयसि प्रथमे' इनि सूत्रस्यार्थं सोदाहरणं लिखत।

(g) 'सपत्नी' इत्यस्य कः अर्थः? केन सूत्रेण नकारादेशः भवति?

(h) 'संज्ञायाम्' इति सूत्रेण कद्रुकमण्डलुशब्दयोः कः प्रत्ययः विधीयते?

**2.** ससूत्रं स्त्रीलिङ्गे रूपाणि साधयत (केषाञ्चन *चतुर्णाम्*) 5×4=20

अजा, कुरुचरी, कुमारी, गार्गी, गौरी, गोपी, गार्ग्यायनी

**3.** कस्या*प्येकस्य* सूत्रस्य व्याख्या कार्या। 10×1=10

(a) 'अजाद्यतष्टाप्' 'टाबृचि' इत्यनयोः व्याख्या कार्या।

(b) 'टिड्ढाणञ्*द्वयसज्*दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः', 'स्त्रियाम्' इत्यनयोः व्याख्या कार्या।

(c) 'इन्द्रवरूणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' 'अभाषितपुंस्काच्च' इत्यनयोः व्याख्या विधेया।

———————